श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीगुरुपवनपुराधीशाय श्रीकृष्णाय परब्रह्मणे नमः

श्री मेल्पत्तूर् नारायणभट्टतिरेः कृतिषु

# ॥ श्रीमन्नारायणीये अष्टचत्वारिंशं दशकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमन्नारायणीये अष्टचत्वारिंशं दशकम् ॥

## यमलार्जुनभञ्जनवर्णनम्

मुदा सुरौघैस्त्वमुदारसम्मदै -
    रुदीर्य दामोदर इत्यभिष्टुतः।
मृदूदरः स्वैरमुलूखले लग -
    न्नदूरतो द्वौ ककुभावुदैक्षथाः ॥ **48.1** ॥

कुबेरसूनुर्नलकूबराभिधः
    परो मणिग्रीव इति प्रथां गतः।
महेशसेवाधिगतश्रियोन्मदौ
    चिरं किल त्वद्विमुखावखेलताम् ॥ **48.2** ॥

सुरापगायां किल तौ मदोत्कटौ
    सुरापगायद्बहुयौवतावृतौ।
विवाससौ केलिपरौ स नारदो
    भवत्पदैकप्रवणो निरैक्षत ॥ **48.3** ॥

भिया प्रियालोकमुपात्तवाससं
    पुरो निरीक्ष्यापि मदान्धचेतसौ।
इमौ भवद्भक्त्युपशान्तिसिद्धये
    मुनिर्जगौ शान्तिमृते कुतः सुखम् ॥ **48.4** ॥

युवामवाप्तौ ककुभात्मतां चिरं
    हरिं निरीक्ष्याथ पदं स्वमाप्नुतम्।

इतीरितौ तौ भवदीक्षणस्पृहां
गतौ व्रजान्ते ककुभौ बभूवतुः ॥ **48.5** ॥

अतन्द्रमिन्द्रद्रुयुगं तथाविधं
समेयुषा मन्थरगामिना त्वया।
तिरायितोलूखलरोधनिर्धुतौ
चिराय जीर्णौ परिपातितौ तरू ॥ **48.6** ॥

अभाजि शाखिद्वितयं यदा त्वया
तदैव तद्गर्भतलान्निरेयुषा।
महात्विषा यक्षयुगेन तत्क्षणा -
दभाजि गोविन्द भवानपि स्तवैः ॥ **48.7** ॥

इहान्यभक्तोऽपि समेष्यति क्रमात्
भवन्तमेतौ खलु रुद्रसेवकौ।
मुनिप्रसादाद्भवदङ्घ्रिमागतौ
गतौ वृणानौ खलु भक्तिमुत्तमाम् ॥ **48.8** ॥

ततस्तरूद्दारणदारुणारव -
प्रकम्पिसम्पातिनि गोपमण्डले।
विलज्जितत्वज्जननीमुखेक्षिणा
व्यमोक्षि नन्देन भवान् विमोक्षदः ॥ **48.9** ॥

महीरुहोर्मध्यगतो बतार्भको
हरेः प्रभावादपरिक्षतोऽधुना।
इति ब्रुवाणैर्गमितो गृहं भवान्
मरुत्पुराधीश्वर पाहि मां गदात् ॥ **48.10** ॥

॥ इति श्रीमन्नारायणीये अष्टचत्वारिंशं दशकं समाप्तम् ॥